# Rishigautamaproktam Umamaheshvarangapujavarnanam

# ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરાઙ્ગપૂજાવર્ણનમ્

## Document Information

Text title : Rishigautamaproktam Umamaheshvarangapujavarnanam

File name : umAmaheshvarAngapUjAvarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 208-248||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરાઙ્ગપૂજાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

ગૌતમ ઉવાચ

તતોઽઙ્ગપૂજા કર્તવ્યા શિવયોર્યત્નપૂર્વકમ્ ।
મૂલમન્ત્રેણ કર્તવ્યં પૂર્વોક્તમપિ પૂજનમ્ ॥ ૨૪૯॥

ઉક્તમન્ત્રં સમુચ્ચાર્ય યથાપૂર્વં યથાક્રમમ્ ।
શિવસ્ય મૂલમન્ત્રસ્તુ શ્રીમત્પઞ્ચાક્ષરઃસ્મૃતઃ ॥ ૨૫૦॥

આવહન્તીતિ મન્ત્રસ્તુ ભવાન્યઃ પરિકીર્તિતઃ ।
શિવાય નમઃ શિરઃ પૂજયામિ ।
કપર્દિને નમઃ કપર્દં પૂજયામિ ।
ભાલલોચનાય નમઃ ભાલં પૂજયામિ ।
સોમસૂર્યાગ્નિલોચનાય નમઃ નેત્રાણિ પૂજયામિ ।
વેદવક્ત્રાય નમઃ વક્ત્રં પૂજયામિ ।
શ્રુતિશ્રોત્રાય નમઃ શ્રોત્રાણિ(ત્રે) પૂજયામિ ।
ઘ્રાતગન્ધાય નમઃ ઘ્રાણાનિ(ણં) પૂજયામિ ।
સ્મૃતિદન્તાય નમઃ દન્તાન્ પૂજયામિ ।
શ્રુતિજિહ્વાય નમઃ જિહ્વાઃ(મ્) પૂજયામિ ।
વેદકપોલાય નમઃ કપોલાનિ(લે) પૂજયામિ ।
જ્ઞાનોષ્ઠાય નમઃ ઓષ્ઠાન્(ષ્ઠૌ) પૂજયામિ ।
નીલકણ્ઠાય નમઃ કણ્ઠાન્(ઠમ્) પૂજયામિ ।
ભૂરિવક્ષસે નમઃ વક્ષાંસિ(ક્ષઃ) પૂજયામિ ।
હિરણ્યબાહવે નમઃ બાહૂન્ પૂજયામિ ।
વિશ્વોદરાય નમઃ ઉદરાણિ(રં) પૂજયામિ ।
વિશ્વપાર્શ્વાય નમઃ પાર્શ્વાન્(શ્વૌ) પૂજયામિ ।
વિશ્વકટયે નમઃ કટીન્(ટિં) પૂજયામિ ।
વિશ્વોરવે નમઃ ઊરૂન્(રૂ) પૂજયામિ ।

વિશ્વજઙ્ઘાય નમઃ જઙ્ઘાન્(ઙ્ઘે) પૂજયામિ ।
વિશ્વપદે નમઃ પાદાન્(દૌ) પૂજયામિ ।
વિશ્વનખાય નમઃ નખાન્ પૂજયામિ ।
સર્વાત્મકાય નમઃ સર્વાઙ્ગં પૂજયામિ ।
શિવાયૈ નમઃ શિરઃ પૂજયામિ ।
પૃથુવેણ્યૈ નમઃ વેણીં પૂજયામિ ।
સીમન્તવિરાજિતાયૈ નમઃ સીમન્તં પૂજયામિ ।
કુઙ્કુમભાલાયૈ નમઃ ભાલં પૂજયામિ ।
સોમસૂર્યાગ્નિનેત્રાયૈ નમઃ નેત્રાણિ પૂજયામિ ।
શ્રુતિશ્રોત્રાયૈ નમઃ શ્રોત્રે પૂજયામિ ।
ગન્ધપ્રિયાયૈ નમઃ ઘ્રાણં પૂજયામિ ।
સુભગકપોલાયૈ નમઃ કપોલે પૂજયામિ ।
કુડ્મલદન્તાયૈ નમઃ દન્તાન્ પૂજયામિ ।
વિદ્યાજિહ્વાયૈ નમઃ જિહ્વાં પૂજયામિ ।
બિમ્બોષ્ઠ્યૈ નમઃ ઓષ્ઠૌ પૂજયામિ ।
વૃત્તકણ્ઠાયૈ નમઃ કણ્ઠં પૂજયામિ ।
પૃથુકુચાયૈ નમઃ કુચૌ પૂજયામિ ।
વિશ્વગર્ભાયૈ નમઃ ઉદરં પૂજયામિ ।
શુભકટ્યૈ નમઃ કટિં પૂજયામિ ।
દિવ્યોરુદેશાયૈ નમઃ ઊરૂ પૂજયામિ ।
સુજઙ્ઘાયૈ નમઃ જઙ્ઘે પૂજયામિ ।
લક્ષ્મીસેવિતપાદુકાયૈ નમઃ પાદૌ પૂજયામિ ।
મહેશ્વરપ્રિયાયૈ નમઃ નખાન્ પૂજયામિ ।
શોભનવિગ્રહાયૈ નમઃ સર્વાઙ્ગં પૂજયામિ ।
અઙ્ગપૂજાં સમાપ્યૈવં દોરકં ચ સમર્પયેત્ ॥ ૨૫૧॥

પ્રત્યેકં ગ્રન્થિષુ સ્વચ્છેષ્વચ્છેબિલ્વદલાદિભિઃ ।
પ્રથમં ગ્રન્થિમારભ્ય નમઃ સોમેતિ મન્ત્રતઃ ॥ ૨૫૨॥

યથાક્રમેણ સમ્પૂજ્ય તતો ધાર્યં હિ દોરકમ્ ।
તત્રોપચારઃ સર્વોઽપિ તેન મન્ત્રેણ સાદરમ્ ॥ ૨૫૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરાઙ્ગપૂજાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૨૦૮-૨૪૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 208-248..

Notes:

Having described about the UmāMaheshvara Dhyānam ઉમામહેશ્વર ધ્યાનમ્ and UmāMaheshvara Pūjā ઉમામહેશ્વર પૂજા as part of the UmāMaheshvara Vrata ઉમામહેશ્વર વ્રત, Ṛṣi Gautama ઋષિ ગૌતમ further details about the UmāMaheshvara AṅgaPūjā ઉમામહેશ્વર અઙ્ગપૂજા with Mantra મન્ત્ર.

In this Chapter 22, Ṛṣi Gautama ઋષિ ગૌતમ further elaborates about the remaining procedures for concluding the UmāMaheshvara Vrata ઉમામહેશ્વર વ્રત.

Proofread by Ruma Dewan

---

*Rishigautamaproktam Umamaheshvarangapujavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*